# ||षोडश मातृकाधीश्वर स्तवः ||

www.kamakotimandali.com

Mahāmaheśvara ācārya Abhinavagupta, in his Soḍaśa Mātṛkādhīśvara Stava, describes the Mātṛkā Prakriyā of Mahāśāmbhava yoga. The sixteen forms of śiva that represent the sixteen vowels ('a' to 'aH') manifest in various śakti-spandas and encode in them the mysteries of śāmbhava yoga sādhanā. These sixteen forms are: amṛta, amṛtapūrṇa, amṛtābha, amṛtadrava, amṛtaugha, amṛtormi, amṛtasyandana, amṛtāṅgada, amṛtodgāra, amṛtāsya, amṛtatanu, amṛtaniṣecana, amṛtamūrti, amṛteśa, sarvāmṛtadhara. It is a Siddha Stotra that can free one of various bodily afflictions, diseases and poisons.

अमृतमनन्तमनुत्तरमघोरषोडशकशक्तिचक्रगतम् |
औन्मनसपदनिरूढि प्रथमोपोद्धातकं वन्दे || १ ||

आनन्दममृतपूर्णं सामनसे परपदे परं सत्यम् |
घटितानुत्तरदृढतमनिरूढिभाजं शिवं वन्दे || २ ||

इच्छाशक्तिसुनिर्भरममृताभमनन्तभुवनजननपटुम् |

वन्दे स्वशक्तिलहरीबहलितभैरवपरानन्दम् || ३ ||

ईश्वरमशेषतापप्रशमनममृतद्रवं सदा वन्दे |
अप्रतिघातिस्वेच्छाविकासविश्रान्तममृतकरमौलिम् || ४ ||

यदनुत्तरसम्बोधादानन्दविकस्वरेच्छया पूर्णम् |
ईश्वरमुन्मिषदमृतौघसुन्दरं तत् स्तुवे धाम || ५ ||

अहमानन्दघनेच्छा घटितेश्वरतोन्मिषत् समस्तोर्मिः |
इत्युल्लासतरङ्गितममृतोर्मिमहं चिदर्णवं वन्दे || ६ ||

स्वप्रसरप्रेङ्खितविलसदूर्मिसंक्षुभितचिद्रसापूरम् |
अमृतस्पन्दनसारं भैरवसंविन्महार्णवं वन्दे || ७ ||

पूर्वं यदनुत्तरममृतभूमिमासाद्य सप्तमीं कलनाम् |
विश्राम्यति तत् प्रणमाम्यमृताङ्गदं परानन्दि || ८ ||

शिवममृतवपुषममृतकलाचतुष्टयतृतीयभागजुषम् |
प्रणमामि भासयन्तं क्रमरहितेऽपि क्रममनेकम् || ९ ||

सञ्जीवनतुर्यकलाकलितविबोधं समस्तभावानाम् |
दूषणविषशीर्णानाममृतोद्धारं शिवं वन्दे || १० ||

एकमनुत्तररूपात् प्रभृतित्रिकशक्तिपूरितानन्दम् |
अमृतास्यमस्य जगतः प्रमाणभूतं शिवं वन्दे || ११ ||

ऐक्य परमार्थकलया त्रिशक्तियुगघटितवैश्वरूप्यमहम् |
अमृततनुमतनुबोधप्रसरमहाकारणं स्मरामि हरम् || १२ ||

ओतप्रोतं सकलं विद्ध्वा स्वरसेन शिवमयीकुरुते |
योऽनुत्तरधाम्न्युदयन् स्वयममृतनिषेचनं तमस्मि नतः || १३ ||

औषधमाधिव्याधिषु पाशत्रयशातनं त्रिशूलकरम् |
वन्देऽहममृतमूर्तिं पूर्णत्रिकशक्तिपरमार्थम् || १४ ||

बैन्दवममृतरसमयं वन्दे योऽनुत्तरे निजे धाम्नि |
पूर्णीभावयतितमामृतेशं तं नमस्यामि || १५ ||

प्रसृतमनुत्तररूपादानन्दादिक्रमेण विश्वमदः |
सर्वामृतधारमन्तर्बहिश्च विसृजन्तमभिवन्दे || १६ ||

**||ṣoḍaśa mātṛkādhīśvara stavaḥ ||**

amṛtamanantamanuttaramaghoraṣoḍaśakaśaktica
kragatam |
aunmanasapadanirūḍhi prathamopoddhātakaṃ
vande || 1 ||

ānandamamṛtapūrṇaṃ sāmanase parapade paraṃ
satyam |
ghaṭitānuttaradṛḍhatamanirūḍhibhājaṃ śivaṃ
vande || 2 ||

icchāśaktisunirbharamamṛtābhamanantabhuvana
jananapaṭum |
vande
svaśaktilaharībahalitabhairavaparānandam ||
3 ||

īśvaramaśeṣatāpapraśamanamamṛtadravaṃ sadā
vande |
apratighātisvecchāvikāsaviśrāntamamṛtakaram
aulim || 4 ||

yadanuttarasambodhādānandavikasvarecchayā
pūrṇam |
īśvaramunmiṣadamṛtaughasundaraṃ tat stuve
dhāma || 5 ||

ahamānandaghanecchā ghaṭiteśvaratonmiṣat
samastormiḥ |
ityullāsataraṅgitamamṛtormimahaṃ cidarṇavaṃ
vande || 6 ||

svaprasarapreṅkhitavilasadūrmisaṃkṣubhitaci
drasāpūram |
amṛtaspandanasāraṃ bhairavasaṃvinmahārṇavaṃ
vande || 7 ||

pūrvaṃ yadanuttaramamṛtabhūmimāsādya
saptamīṃ kalanām |

viśrāmyati tat praṇamāmyamṛtāṅgadaṃ
parānandi || 8 ||

śivamamṛtavapuṣamamṛtakalācatuṣṭayatṛtīyabh
āgajuṣam |
praṇamāmi bhāsayantaṃ kramarahite.api
kramamanekam || 9 ||

sañjīvanaturyakalākalitavibodhaṃ
samastabhāvānām |
dūṣaṇaviṣaśīrṇānāmamṛtodgāraṃ śivaṃ vande
|| 10 ||

ekamanuttararūpāt
prabhṛtitrikaśaktipūritānandam |
amṛtāsyamasya jagataḥ pramāṇabhūtaṃ śivaṃ
vande || 11 ||

aikya paramārthakalayā
triśaktiyugaghaṭitavaiśvarūpyamaham |
amṛtatanumatanubodhaprasaramahākāraṇaṃ
smarāmi haram || 12 ||

otaprotaṃ sakalaṃ viddhvā svarasena
śivamayīkurute |
yo.anuttaradhāmnyudayan
svayamamṛtaniṣecanaṃ tamasmi nataḥ || 13 ||

auṣadhamādhivyādhiṣu pāśatrayaśātanaṃ triśūlakaram |
vande.ahamamṛtamūrtiṃ pūrṇatrikaśaktiparamārtham || 14 ||

baindavamamṛtarasamayaṃ vande yo.anuttare nije dhāmni |
pūrṇībhāvayatitamāmṛteśaṃ taṃ namasyāmi || 15 ||

prasṛtamanuttararūpādānandādikrameṇa viśvamadaḥ |
sarvāmṛtadhāramantarbahiśca visṛjantamabhivande || 16 ||

www.kamakotimandali.com